International Journal of Sanskrit Research 2019; 5(3): 123-126

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(3): 123-126
© 2019 IJSR
www.anantaajournal.com
Received: 13-03-2019
Accepted: 15-04-2019

**Govind Shukla**
Research Scholar,
Rastriya Sanskrit Sansthan,
Bhopal Campus, Bhopal,
Madhya Pradesh, India

**Correspondence**
**Govind Shukla**
Research Scholar,
Rastriya Sanskrit Sansthan,
Bhopal Campus, Bhopal,
Madhya Pradesh, India

# शब्दार्थतर्कामृतदृष्ट्या लकारार्थविमर्शः

**Govind Shukla**

## प्रस्तावना

लः कर्मणि च भावे चाऽकर्मकेभ्यः (३।४।६९) इति सूत्रेण कर्तरि कर्मणि भावे च लकारस्य विधीनं विहितं पाणिनिना। यद्यपि कर्तृकर्मसङ्ख्याकालाः तिङर्थाः तथापि स्थानिन्यर्थः आदेशे आरोप्य एतेषु अर्थेषु लकारः विहितः। अत्र प्रत्यार्थविषये वैयाकरणमीमांसकनैयायकेषु काचित् विमतिः वर्तते। वैयाकरणाः धातोः फलव्यापारौ अर्थौ [1] मन्वते परञ्च मीमांसकानां मते भावना व्यापारवाच्या एवञ्च नैयायिकानां मते कृतिः। मौनिश्रीकृष्णभट्टेन मीमांसकमते इयं शङ्का उद्भाविता यदि प्रत्यर्थः भावना चेत् धातुः फलमात्रस्य वाचकः अपि च व्यापारोऽपि। यदि व्यापारः धातोः अर्थः न स्वीक्रियते चेत् क्रियावाचकत्वाभावे भूतादयोः धातवः इति सूत्रेण धातुसञ्ज्ञायाः आपत्तिः यदि व्यापारः धातोः अर्थ इति स्वीक्रियते चेत् व्यापारद्वयबोधापत्तिः यतोहि भावनाऽपि व्यापारपर्याय [2] एव। एवमेव प्रत्ययार्थकृतिस्वीकारेऽपि पूर्वोक्तदोषाः एव। [3] अत एव वैयाकरणैः तिङर्थः कर्तृकर्मसङ्ख्याकाला इमे अर्थाः स्वीकुर्वन्ति। इदानीं स्थानिभूतस्य लकारस्यैव एते अर्था इति मनसि निधाय शब्दार्थतर्कामृतग्रन्थदिशा विचारः क्रियते-

मुख्यतया त्रय एव कालाः वर्तन्ते वर्तमानभूतभविष्यद्भेदात्। परोक्षापरोक्षाऽद्यतनानद्यतनभेदेन एते कालः प्रथन्ते। तत्र वर्तमाने लट् इति सूत्रेण वर्तमानकालस्य विवक्षायां धातोः लट् लकारः जायते अत्र वर्तमानत्वञ्च प्रारब्धपरिसमाप्तित्वमिति परञ्च अस्मिन् वर्तमानकाले द्योत्वे एव लट् लकारः जायते इति वक्तुं न शक्यते भविष्यदादिषु अर्थेषु अपि प्रयोगदर्शनात्। यथा यजति स्म युधिष्ठिरः इत्यादिषु प्रयोगेषु लट् स्मे इति सूत्रेण भूतानद्यतनपरोक्षत्वार्थे स्म इति उपपदे धातोः लट्लकारः जातः। अत्र स्म इति अव्ययं भूतकालार्थस्य द्योतकम्।[4] युधिष्ठिरकर्तृका देवपूजनानुकूलाभूतानद्यतनपरोक्षा क्रिया इति शाब्दबोधो जायते। यजति इत्यस्य इयाज इत्यर्थः। एवमेव स्म पिता ब्रवीत् इत्यत्रापि अपरोक्षे च इति

सूत्रेण अपरोक्षभूतानद्यतन अर्थे स्म उपपदे धातोः लट्लकारः जातः। 'लट् स्मे' [5] इदं सूत्रं परोक्षे अर्थे लट् विधीयते अत एव अपरोक्षार्थे लटः विधानाय सूत्रमिदं निगदितम्। एतेन पितृकर्तृका अपरोक्षभूतानद्यतनाऽव्यक्तवचनाऽनुकूला क्रिया इति शाब्दबोधः।

ननौ प्रष्टप्रतिवचने इति सूत्रेण भूतसामान्ये अर्थे ननु इति अव्यये उपपदे प्रश्नपूर्वके प्रतिवचने धातोः लट्प्रत्ययो भवति। पृष्टस्य प्रतिवचने इति विग्रहे षष्ठीसमासः विज्ञेयः समाहारद्वन्द्वसमासः स्वीकारे तु पृष्टे प्रतिवचने उभयस्मिन् वाक्ये लट्प्रयोगः स्यात्। ननु पदसमभिव्याहारे पृष्टस्य प्रतिवचनेऽकार्षीः किं नु करोमि इत्यादौ भूते लट् अकार्षमित्यर्थः। ननु पदयोरसमभिव्याहारे पृष्टस्य प्रतिवचनेऽकार्षीः किम्? न करोमि नाकार्षम्, अहन्नु करोम्यहन्नु अकार्षमित्यादौ भूतमात्रं लडर्थः। अस्मत्कर्तृका भूतप्रतिवचनाऽनुकूला क्रियेति बोधः। [6] भाष्यकारमते तु अयं लट्प्रत्ययः क्रियाऽपरिसमाप्तिगम्यमाने सत्येव जायते। अत्र शङ्यते यदि क्रियाऽपरिसमाप्तिगम्यमान एव यदि अस्य सूत्रस्य प्रवृत्तिः चेत् वर्तमाने लट् इति सूत्रेणैव लट् स्यात् किमर्थं सूत्रमिदं चेदुच्यते यदि वर्तमाने लट् इति सूत्रेण लट् विधीयते चेत् शतृशानचौ स्याताम्। पुनश्च भाष्यकारेणोक्तं ननु इत्योपदेऽपि शतृशानचौ तु प्रवर्तते एव ननु मां कुर्वन्तं पश्य। ननु मां कुर्वाणं पश्येति। तर्हि वर्तमाने लट् इति सूत्रेण एव लट् सिद्धे सूत्रमिदं प्रत्याख्यातव्यमिति भाष्याशयः। [7] तथोक्तं प्रदीपे कैयटेन - इष्यते इत्यनेन प्रत्याख्यानं [8] द्रढयति। यदि हि भूताश्रयो लट् क्रियते तदा वर्तमानाधिकाराद्वर्तमाने विहितस्य लटो विधीयमानौ शतृशानचावस्य न स्याताम्। [9]

पुरि लुङ् चाऽस्मे इत्यस्मिन् सूत्रे मण्डूकप्लुत्या अनद्यतने इति अनुवर्तते। पुरि इत्यस्य पुराशब्दे उपपदे इत्यर्थः। तथोक्तं न्यासे- पुराशब्दे इति। एतेन पुराशब्द इहोपपदत्वेनोपात्तो न पुरिति दर्शयति। यद्येतदेव, अस्याकारान्तत्वात् पुरीति सप्तम्यन्तो निर्देशो नोपपद्यते? `आतो धातोः` **6|4|140** इति योगविभागादाकारलोपाददोषः । पुराशब्दे उपपदे स्मशब्दवर्जिते भूतानद्यतनेऽर्थे विकल्पेन लुङ् प्रत्ययः लट् प्रत्ययश्च भवति इत्यर्थः लभ्यते। तथाहि अस्मत्पदासभिव्याहृतपुराशब्दयोगे वसन्तीह पुरा। अवत्सु। अवसन्। ऊषुर्वा इत्यत्र भूतानद्यतना छात्रकर्तृका वासक्रियेति बोधः। अत्र भूतानद्यतनत्वं लडर्थः।

यावत्पुरानिपातयोर्लट् इति पाणिनेः अनुशासनात् निश्चयद्योतकयावत्पुरानिपारयोरुपपदे भविष्यति अर्थे लट् लकारः जायते। अयं लट् प्रत्ययः लुटं पूर्वविप्रतिषेधेन प्रबाध्य प्रवर्तते। तथोक्तं भाष्ये- यावत्पुरादिषु लड्विधिर्लुटः पूर्वविप्रतिषिद्धम्। यावत् पुरादिषु लड्विधिर्भवति लुटः पूर्वविप्रतिषेधेन। [10] यावत्पुरानिपातयोर्लङ्गवतीत्यस्यावकाशः। यावद्भुङ्क्ते।पुरा भुङ्क्ते। देवदत्तकर्तृका भविष्यत्कालिकी निश्चितक्रियेति बोधः। निश्चितं भोक्ष्यत इत्यर्थः। [11] लृङ्लकारस्य भविष्यत्कालोऽर्थः। भविष्यत्वञ्च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्। [12] वर्तमामाने यस्य अभावस्य ध्वंसः जातः तस्य प्रतीयोगी यः समयः तदधिकरणके उत्पत्तिमत्क्रियावत्त्वमेव भविष्यत्वम् [13] उच्यते। अयञ्च भविष्यत्कालः अद्यतनाऽनद्यतनभेदेन द्विविधः। अनद्यतने भविष्यति क्रियायां द्योत्ये धातोः लुट् लकारो जायते अनद्यतने लुट् (पा०सू० ३।३।१५) इति पाणिन्यनुशासनात्। यथा श्वः सभा भविता इत्यादयः। भविष्यत्सामान्ये अर्थे द्योत्ये लृट् शेषे च (पा०सू० ३।३।१३) इति सूत्रेण धोतोः लृट् लकारः जायते। लृट् शेषे च इति सूत्रस्य स्थाने भविष्यति लृट् इति सूत्रं किमर्थं न कृतं। सूत्रे शेषग्रहणं कृतं तस्य किं प्रयोजनमिति जिज्ञासायामुच्यते भगवता पतञ्जलिना- लृटि शेषवचनं क्रियायां प्रतिपदविध्यर्थम्।लृटि शेषवचनं क्रियते क्रियायां प्रतिपदविधिर्यथा स्यात्। अविशेषेण विधाने लृटोऽभावः प्रतिषिद्धत्वात्।अविशेषेण हि विधाने सति लृटोऽभावः स्यात्। करिष्यामीति व्रजति।। किं

कारणम्? प्रतिषिद्धत्वात्। इदानीमेव ह्युक्तं क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयो न भवन्तीति। लृट्वापि तृजादिः। अस्ति प्रयोजनमेतत्। किं तर्हीति।साधीयस्तुखलु शेषग्रहणेन क्रियार्थोपपदाद्लृण्निर्भज्यते। किं कारणम्। अक्रियार्थोपपदत्वात्। शेष इत्युच्यते। शेषश्च कः। यदन्यत् क्रियायाः क्रियार्थायाः। लृटि शेषवचनं क्रियायां प्रतिपदविध्यर्थम्। लृटि शेषवचनं क्रियते क्रियायां प्रतिपदविधिर्यथा स्यात्। लृट् शेषे च। करिष्यति हरिष्यति इति। क्व च। क्रियायामुपपदे क्रियार्थायामिति। [14]

कदा कर्हि वा भुङ्क्ते इत्यत्र विभाषा कदाकर्ह्योः इति अनुशासनात् अद्यतनानद्यतनभविष्यति अर्थे लट् लकारः जायते। अतः भुङ्क्ते इत्यस्य भोक्ष्यते भोक्ता इत्यर्थः। देवदत्तकर्तृकाद्यननाद्यतनभविष्यत्कालिकी भुजिक्रिया कालविशेषप्रश्नविषयेति बोधः। [15]

किंवृत्ते लिप्सायाम् (३।३।६) इत्यनुशासनात् किंवृत्ते उपपदे लिप्सायामर्थे गम्यमाने भविष्यत्सामान्ये अर्थे द्योत्ये धातोः लट् लकारः जायते। लब्धुमिच्छायां किंवृत्ते कं कतरं कतमं वा भोजयति इत्यस्मिन् प्रयोगे भविष्यति अर्थे लट् लकारः। भोजयिष्यसि भोजयितासि वा इत्यर्थः। एतेन देवदत्तकर्तृका भविष्यद्विषयिणी अनियतकर्मिका भोजनविषयिणी प्रवर्तनेति शाब्दबोधः। [16] एवमेव लिप्स्यमानसिद्धौ च (३।३।७) इति सूत्रेण लिप्स्यमाने अर्थे भविष्यसामान्य द्योत्ये धातोः लट् लकारः विधीयते अत्र शङ्का समुदेति लिप्सया लिप्सामान्यस्यग्रहणे पूर्वसूत्रेणैव लटि सिद्धे किमर्थं सूत्रमिदम् उपन्यस्तम्। अस्य समाधानाय ब्रवीति भाष्यकारः किंवृत्ते लिप्सायाम् इति सूत्रेण किंवृते उपपदे एव लट्लकारः जायते तदभावे लट्लकारविधानार्थं सूत्रमिदमावश्यकम्। [17] एतेन योऽन्नं ददाति स्वर्गलोकं यातीत्यादौ भविष्यति अर्थे लट् प्रत्ययो जायते। दास्यति दाता वा इत्यर्थः एवमेव स स्वर्गं याति इत्यत्रापि भविष्यत्कालिकक्रियायावचकः याति इति पदम् यास्यति इत्यर्थः।

लोडर्थलक्षणे च इत्यनेन शास्त्रेण लोडर्थलक्षणे सति भविष्यत्सामान्ये अर्थे द्योत्ये धातोः लट् लकारः विकल्पेन प्रवर्तते। लोट् लकारः विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नेषु अर्थे निर्दिष्टः। तेषु अर्थेषु विषयभूतेषु शास्त्रोऽयं प्रवर्तते। [18] कृष्णश्चेद्भुङ्क्ते त्वं गाश्चारय इत्यस्मिन् प्रयोगे भविष्यत्यर्थे लट् लकारः भोक्ष्यते इत्यर्थः। मुहूर्तादुपरि उपाध्यायश्चेदागच्छति अथ त्वं छन्दोऽधीष्व इत्यत्राऽपि लिङ् चोर्ध्वमौहूर्तिके (३।३।९) इति सूत्रेण भविष्यत्काले द्योत्ये लिङ्गर्थस्यविषयतायां लट् अभूत्।

वर्तमानसामीप्ये वर्तमानवद्वा इति पाणिन्यनुशासनेन वर्तमानकालस्य समीपे यः कालः तस्मिन् काले द्योत्य वर्तमानवद्प्रत्ययाः प्रवर्तते। समीपमेव सामीप्यमत्र स्वार्थे ष्यत्र् प्रत्ययः। वर्तमानस्य समीपः कालः भूतकालः भविष्यत्कालो वा। तयोः वर्तमानसामीप्येन ग्रहणं जायते। वर्तमानवत्द्वा इत्यत्र वत्करणं किमर्थं कृतम् वर्तमानसामीप्ये वर्तमाने वा इति सूत्रं स्यात् चेदुच्यते भाष्यकारः वर्तमानसामीप्ये वर्तमाने वा इतीयत्युच्यमाने वर्तमाने ये प्रत्यया विहितास्ते वा वर्तमानसामीप्ये धातुमात्रात्स्युः। वत्करणे पुनः क्रियमाणे न दोषो भवति। [19] कदा आगतोऽसि इत्यस्मिन् प्रश्ने भूतकालार्थके वर्तमानसामीप्यात् वर्तमानकालप्रयोगः। अयमागच्छामि इत्यस्य लट् भूतकालत्वद्योतकः अयमिति प्रयोगस्तु वर्तमानसामीप्यभूतवर्तमानद्योतनाय।

अयमागममित्यर्थः। तदा गमिष्यसि इति प्रश्ने एष गच्छामि इत्यत्रापि भविष्यत्कालिकक्रियायाद्योतकः लट्लकारः। एष इति प्रयोगस्तु वर्तमानसामीप्यभविष्यत्कालद्योतनाय। देवश्चेद् वर्षति धान्यं वप्स्यामः। यथाक्रमं वर्षिष्यति वप्याम इत्यर्थः। [20]

एतेन वर्तमानत्वं न केवलं आरब्धपरिसमाप्तिरूपं प्रत्यक्षविषयं ग्राह्यम् अपितु भूतविष्यद्वर्तमानकालास्सन्तीत्यत्र भूतभविष्यतो वर्तमानसत्ताभावेऽपि बौद्धं वर्तमानमपि स्वीकर्तव्यम्।

अत एव शब्दार्थतर्कामृते अवोचि मौनिश्रीकृष्णभट्टैः- भूतभविष्यद्वर्तमानकालास्सन्तीत्यत्र भूतोभविष्यतो वर्तमानसत्ताभावेऽपि बौद्धं वर्तमानत्वम्। यद्वा देवदत्तादिप्रथमान्तपदासमभिव्याहृतपचतीत्यादावाख्या तोपात्तसंख्याया अनन्वितवर्तमानकालो-ऽनन्वित एव। यद्वैकप्रवर्तमानत्वस्यान्वयः। [21] तार्किकाणां यद्सिद्धान्तं वर्तमानत्वमेव लडर्थ भविष्यत्वञ्च लृटोऽर्थः इति न सङ्गच्छते।

लिटः अनद्यतनपरोक्षभूतत्वमर्थः, भूतत्वञ्च

संदर्भ

1. फलव्यापारयोः धातुः आश्रये तु तिङः स्मृताः। वैयाकरणभूषणसारः, धात्वर्थः, कारिका- १
2. व्यापारो भावना सैवोत्पादना सैव च क्रिया। वैयाकरणभूषणसारः, धात्वर्थः कारिका-
3. किञ्च भावनायाः प्रत्ययार्थत्वे धातोस्तदस्ति न वा। आद्ये व्यापारद्वयबोधापत्तिः। द्वितीयेऽक्रियावाचित्वाद् धातुत्वानापत्तिः। यदि तु भावनाशब्देन कृतिरित्युच्यते तदा पूर्वोक्त एव दोषः। शब्दार्थतर्कामृतम् २३.१ पृ०सं० ७७
4. तत्त्वबोधिनी, पृ०सं०......
5. पा०सू० ३।२।१२०
6. शब्दार्थतर्कामृतम् २३.२ पृ०सं० ७७।
7. क्रियाया अत्राऽसमाप्तिर्विवक्षिता। एष नाम न्याय्यो वर्तमानः कालो यत्र क्रियाया असमाप्तिर्भवति, तत्र वर्तमाने लडित्येव सिद्धम्। यदि वर्तमाने लडित्येव लड्भवति शतृशानचौ प्राप्नुतः। इत्येते शतृशानचौ। ननु मां कुर्वन्तं पश्य। ननु मां कुर्वाणं पश्येति। महाभाष्यम् ३।२।१२०।।
8. प्रत्याख्यानमिति। सूत्राऽऽरम्भे इष्टाऽसिद्ध्यतेति भावः। उद्योतः, तत्रैव।
9. प्रदीपः ३।२।१२०।।
10. महाभाष्यम् ३।३।४।।
11. शब्दार्थतर्कामृतम्, तत्रैव
12. वैयाकरणभूषणसारः, लकारार्थनिरूपणम्, पृ०सं० १५०
13. वर्तमानो यो ध्वंसः तत्प्रतियोगी यः समयस्तदधिकरणकोत्पत्तिमत्क्रियात्वमिति। वैयाकरणभूषणसारः, प्रभा, तत्रैव
14. महाभाष्यम् ३।३।१३।।
15. शब्दार्थतर्कामृतम् २३.३ पृ० ७८
16. तत्रैव
17. किमर्थमिदमुच्यते। न लिप्स्यमानसिद्धिरपि लिप्सैव। तत्र किंवृत्ते लिप्सायामित्येव सिद्धम्। अकिंवृत्तार्थायमारम्भः। महाभाष्यम्३।३।४।।
18. लोडर्थः प्रैषादिरिति। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु इत्यनुवृत्तौलोट् चेति लोड्विधानादिति भावः, बालमनोरमा, सू० सं० २७८७
19. महाभाष्यम् ३।३।१३१।।
20. शब्दार्थतर्कामृतम्, २३.३ पृ०सं० ७८
21. तत्रैव